# Taravali Stuti

# તારાવલિસ્તુતિઃ

## Document Information

Text title : Taravali Stuti

File name : tArAvalistutiH.itx

Category : deities_misc, gurudev, stuti, ramaNa-maharShi

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Latest update : December 25, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2023

*sanskritdocuments.org*

# તારાવલિસ્તુતિઃ

અજ્ઞાનાન્ધતમો વિમોહિતધિયાં દુર્વાદકોલાહલૈ-
રાલીને સકલે સનાતનપથે કાલેયલીલાયિતૈઃ ।
ક્ષેમાય ક્ષિતિમણ્ડલે કરુણયા કૃત્વાऽऽકૃતિં પ્રાકૃતીં
નિર્ધૂતાખિલદુર્મતો વિજયતે શ્રીશઙ્કરશ્શઙ્કરઃ ॥ ૧॥

પુણ્યૈર્ભૂતલસમ્ભ્રમૈરુપનિષદ્ભાષ્યાદિવાગ્ગુમ્ભનૈઃ
શિષ્યૈશ્ચાપ્યફલીકૃતે સ્વરચિતત્રૈલોક્યરક્ષાક્રમે ।
જીયાચ્છઙ્કરસદ્ગુરોઃ પ્રિયકૃતે જાતાવતારઃ પુનઃ
સોऽયં શ્રીરમણો ગુરુર્ગુણગણૈરધ્યાત્મનિષ્ઠો મુનિઃ ॥ ૨॥

રમણેશપદામ્ભોજ રજઃકણમુપાસ્મહે ।
યદ્વાસનાપરિષ્વઙ્ગાદ્વિગલન્તિ કુવાસનાઃ ॥ ૩॥

આહ્લાદાऽऽવહમઞ્જનં નયનયોરઙ્ગે સુધાલેપનં
ધૈર્યં ચેતસિ ખેદનામકગદપ્રોત્સારકં ભેષજમ્ ।
મધ્યાહ્નાર્ક ઇવ પ્રસૂતિજલધૌ લોકપ્રકાશોદયં
પુણ્યૈઃ શ્રીરમણેશ્વરં પરિણતૈર્ધન્યા લભન્તે નરાઃ ॥ ૪॥

શોણાદ્રીશકુટીવિહારસરસે દગ્ધાઙ્ગજાતૈધસે
કારુણ્યાદિગુણૈકધામમનસેऽન્વર્થીકૃતચ્છન્દસે ।
સર્વાપદ્દુરિતાન્ધસે ભવભયપ્રોદ્ધારકાત્યૌજસે
ભક્તશ્રેણિશિખાદૃતાઙ્ઘ્રિરજસે સેયન્નતિસ્તેજસે ॥ ૫॥

મોહાતીતસ્ત્વમસિ ભગવન્ ! મુગ્ધમૂર્તિં દધાનો
વેલાલઙ્ઘિવ્યવહૃતિરતો વદ્ધ્વન્નાનટીષિ ।
ભક્તત્રાણં ભવજલનિધેરાત્મનૈવ પ્રણેતું
પર્યઙ્કેऽસ્મિન્ વસસિ યદિયં ભાતિ તે કાપિ લીલા ॥ ૬॥

દૂરીકર્તું પ્રભવતિ તવોપાસનૈવ પ્રજાના-

મેનોરાશીનિતિ ગુરુમણે! ત્વત્સમીપાશ્રિતાનામ્ ।
ત્વદ્ભક્તાનામપિ બહુવિધાભીષ્ટકામાર્દિતાનાં
ભીતિં કિં વા સૃજસિ ભગવન્ ! વ્યર્થચિન્તાનિદાનમ્ ॥ ૭॥

નાનાશાખાવિવૃતમહિમા નાશિતાશેષમોહઃ
મૌનાલમ્બી પ્રમુષિતજટસ્સાધુસઙ્ઘૈરુપેતઃ ।
મઞ્ચસ્થોઽયં રમણભગવાન્દક્ષિણામૂર્તિરાસ્તે
પ્રત્યાસત્તેરરુણમહસઃ પ્રાપ્ય સારૂપ્યલક્ષ્મીમ્ ॥ ૮॥

શાન્તેરેકં સદનમમૃતાસારશીતં પ્રકૃત્યા
સૌમ્યં રૂપં રમણભગવન્ ! દર્શનીયં ત્વદીયમ્ ।
વૈરાગ્યાત્તે તૃણવદખિલત્યાગકાલે કરાલે
દ્રષ્ટું દૃષ્ટ્યા ક ઇવ ચતુરસ્ત્વાં ત્વમેવ ક્ષમોઽસિ ॥ ૯॥

સાક્ષાત્કૃત્યાઽરુણધરણિભૃદ્વાસિનં સદ્ગુરું ત્વાં
દ્રક્ષ્યન્ત્યન્યત્કિમિવ યમિનસ્તાવકીનોપદેશૈઃ ।
ઐદમ્પર્યં નિગમશિરસાં યત્ર સચ્ચિત્સ્વરૂપે
બ્રહ્મૈવ ત્વં તદસિ ભગવન્નિત્યમુક્તસ્વરૂપમ્ ॥ ૧૦॥

દારાન્ બન્ધૂનપિ ચ તનયાન્ ક્ષેત્રવિત્તાનિ ગેહં
સન્તસ્ત્યક્ત્વા સકલમપિ તે પાદપદ્મં ભજન્તે ।
કિન્ત્વેતાંસ્ત્વં કપટવચનૈર્ભીષયન્નાથ ! નૈવં
તત્વં બ્રૂયા ન ખલુ ભવતો વઞ્ચનાં તે લભન્તામ્ ॥ ૧૧॥

શબ્દાદ્યાખ્યૈર્વિષયનિચયૈર્વ્યઞ્ચિતં દૃષ્ટનષ્ટં
સૌખ્યં દુઃખોત્તરમપિ મયા બુદ્ધ્યતે મોક્ષતુલ્યમ્ ।
ભોગા એતે રમણ ! વિરસા યસ્ય તે લેશલેશાઃ
સાન્દ્રાનન્દસ્ફુરિતજલધિં ત્વાં તમેવાશ્રયામઃ ॥ ૧૨॥

નાહં યાચે રમણભગવન્ ! લૌકિકં ભોગજાતં
નાપિ સ્વર્ગં સુરપરિબૃઢાધિષ્ઠિતં બ્રહ્મલોકમ્ ।
યાચેઽહં ત્વાં ચરણપતિતસ્ત્વત્પદાબ્જૈકસેવાઽઽ-
ધીનામાત્મપ્રવણનિપુણાં દૃષ્ટિમાન્તર્મુખીં તામ્ ॥ ૧૩॥

ઉર્વ્યાં સ્વૈરં કતિચન જના દેવતાનાં નૃપાણા-
મિભ્યાનાં વા સ્તવનરચનૈઃ કાલજાલં ક્ષિપન્તુ ।
ત્વત્પાદાબ્જાઽઽકલનજનિતાનન્દનિષ્યન્દસિન્ધો-

રન્તશ્ચારૈર્વયમિહ સદા કાલમેતે નયામઃ ॥ ૧૪॥

ગન્તવ્યા સા પ્રભુનિવસતી રઞ્જનીયાસ્તદીયા
ભૃત્યાસ્સેવ્યઃ પ્રભુરપિ ધનૈસ્સદ્મ મે પૂરણીયમ્ ।
ઇત્થં ચિન્તાં ચિરપરિચિતાં નાથ ! સન્ત્યજ્ય સોઽહં
ત્વન્નિધ્યાનાત્ સફલજનનસ્સ્યાં કદા વા વદ ત્વમ્ ॥ ૧૫॥

આઢ્યા દદ્યુર્વસુ વસુમતીં હાટકં વા પટં વે-
ત્યેવં ભ્રાન્ત્યા ધનિકસદનં ત્વામુપેક્ષ્યાઽઽશ્રયામઃ ।
લબ્ધં કિન્નો રમણ ! ભવતોપેક્ષયા જાયમાનૈ-
રેનઃકૂટૈઃ ખલુ કૃપણતા કેવલં વર્દ્ધતે નઃ ॥ ૧૬॥

સંવિદ્ધીનસ્સુરતરુગણઃ કામધેનુઃ પશુસ્સા
ગ્રાવા ચિન્તામણિરપિ કવૌ પક્ષપાતી ચ ભોજઃ ।
કર્ણો દુષ્ટાશ્રયણકલુષઃ કાલકાઙ્ક્ષી પયોદ-
સ્ત્વૌદાર્યે તે રમણ ! તુલનાં યાતિ નાન્યો વદાન્યઃ ॥ ૧૭॥

ગેહો નાકઃ પ્રણમતિ ખલઃ પાતકં પુણ્યતિ દ્રા-
ગ્દ્વેષી મિત્રં વિષયજસુખં મોક્ષતિ ક્ષ્માધિપશ્ચ ।
દાસો મૃત્યુર્ભિષજતિ મહાદૂષણં ભૂષણં સ્યા-
દ્યત્પાદાબ્જપ્રપતનવશાત્તં નમામો ભવન્તમ્ ॥ ૧૮॥

સર્વજ્ઞસ્ત્વં જડમતિરહં ત્વં પ્રભુસ્ત્વેષ દીનઃ
દુઃખાગારઃ પ્રતિપદમહં સૌખ્યપાથોનિધિસ્ત્વમ્ ।
સર્વં કર્તું પ્રભવતિ ભવાનલ્પશક્તિઃ કિલાઽહં
ભિન્નાવસ્થા કિમિતિ જનિતા મય્યભિન્ને ત્વયૈવ ॥ ૧૯॥

સમીહાસન્તાનૈર્હૃદયમિદમાકૃષ્ટમદયં
તતોઽન્યદ્દૈન્યં મે કિમિવ વિપદસ્સન્તિ શતશઃ ।
અનાખ્યેયા અન્યા અલમલમયે ! ઘૂર્ણનમિદં
ભવોર્મિષ્વેતાસુ પ્રવિતર ગુરો ! ચેતસિ શમમ્ ॥ ૨૦॥

ત્વન્મૂર્તૌ મે રમણભગવન્ ! મજ્જતાન્નેત્રયુગ્મં
ત્વદ્ધ્યાનાધ્વન્યપિ પરવશં સ્વાન્તમભ્યેતુ શાન્તમ્ ।
ત્વત્પૂજાર્થં વપુરપિ સદા ત્વત્સ્તુતૌ વાક્ ચ ભૂયાત્
ઇત્થં નોચેદહહ ! ભુવને સ્વૈરચારી હતસ્સ્યામ્ ॥ ૨૧॥

વેદાન્તાસ્તે કતિ કતિ લસન્ત્યેષુ શાખાસ્ત્વનન્તાઃ
તાસામર્થપ્રવચનપરં શાસ્ત્રજાલં ત્વનન્તમ્ ।
તેષાં વર્ણગ્રહણ અપિ વા નાલમેકં પુમાયુઃ
ત્રાતા નસ્ત્વં યદિ ન ગુરુરાટ્ કિં ભવાબ્ધિં તરેમ ॥ ૨૨॥

નામં નામં રમણચરણદ્વન્દ્વમદ્વન્દ્વહેતું
શ્રાવં શ્રાવં હૃદયહિતદાસ્સૂક્તિધારાસ્તદીયાઃ ।
ધ્યાયં ધ્યાયં રમણ ભગવન્ મૂર્તિમવ્યાજભક્ત્યા
બોધં બોધં ભવજલનિધિં દુસ્તરં સન્તરામઃ ॥ ૨૩॥

પ્રસીદ રમણપ્રભો ! મમ હૃદિ પ્રભૂતં ભયં
નિવારય દરિદ્રતાં દલય દેહિ બોધં સ્વકમ્ ।
વિધેહિ કરુણાનિધે ! શિરસિ મે તવાઙ્ઘ્રિદ્વયં
વિદારય જરામૃતિં વિતર વાઞ્છિતં શ્રીગુરો ! ॥ ૨૪॥

દીર્ઘાયુષ્યં કથમિવ જયન્તીદિને પ્રાર્થયામઃ
કર્માયત્તં ભુવિ જનિમતા માયુરાહુર્મહાન્તઃ ।
તાન્ મોહોત્થાન્ વશયતિ ભવાન્ કાલકર્માદિભાવાં-
સ્તત્વજ્ઞાનાદ્દલિતતમસઃ કાલચિન્તા કથં તે ॥ ૨૫॥

ભાન્વબ્દેઽસ્મિન્ સુપદયુજિ તે જન્મવારે શુભંયૌ
આઢ્યા ભક્તા વિલસિતકરાસ્સૂપહારૈર્મહાર્ઘૈઃ ।
સેવન્તે ત્વાં રમણ ! કૃતિનઃ પૂજ્યપાદં કૃતજ્ઞાઃ
ક્ષુદ્રસ્સ્તોત્રં ત્વદુપહૃતયે કલ્પયંસ્તાત ! લજ્જે ॥ ૨૬॥

જય જય રમણેશ ! દીનબન્ધો !
જય જય જનતાર્તિનાશહેતો ! ।
જય જય ભગવન્ ! પ્રબોધમૂર્તે !
જય જય દહનાચલૈકલોલ ! ॥ ૨૭॥

જય જય કરુણામયપુણ્યમૂર્તે !
જય જય વિશ્રુતલોકગીતકીર્તે ! ।
જય જય ભક્તજનાર્પિતૈકભુક્તે !
જય જય સુન્દરદમ્પતીપ્રસૂતે ! ॥ ૨૮॥

તારાવલિસ્તુતિમિમાં રમણેશ્વરીયાં
શ્રુણ્વન્તિ યે ભુવિ પઠન્તિ ચ ભક્તિભાજઃ ।

વિત્તાદિ વૈષયિકસુખેષુ વિરક્તિરેષાં
સંસક્તિરાત્મનિ ભવેદ્રમણપ્રસાદાત્ ॥ ૨૯॥

ઇતિ તારાવલીસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Aruna Narayanan

*Taravali Stuti*

pdf was typeset on December 25, 2023

Please send corrections to *sanskrit@cheerful.com*